Vol 9, Issue 5, 2026 **Impact Factor: 8.535** DOI: https://doi.org/10.31426/ijamsr.2026.9.5.9313

IJAMSR

International Journal of
Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281

# श्रीराधापञ्चशतीकाव्ये वर्णितेषु श्लोकेषु गुणविवेचनम्

**Kumarjit Das [1], Dr. Renu Singh [2]**

[1,2] Department of Sanskrit, Mansarovar Global University, Sehore, M.P., India.

## ❖ उपोद्घातः—

संस्कृतवाङ्मये आप्राचीनकालात् अनेके विद्वांसः अजायन्तः। ते काले काले संस्कृतभाषां पोषयामासुः। तस्माद् कारणादेव संस्कृतभाषा अद्यावधि भूमौ विराजते स्वमहिम्ना च सम्पूर्णं विश्वं मण्डयति भारतस्य ख्यातिं च सम्पूर्णे विश्वे प्रसारयत्यपि। संस्कृतवाङ्मयस्य रक्षणाय सर्वाधिकम् अवदानं साहित्यिकानाम् अस्ति इति वयं मन्यामहे यतो हि साहित्यिकाः समाजस्य कमपि एकं विषयमादाय तस्य चित्रणं कुर्वन्ति, स्वप्रतिभया तस्मिन् अलौकिकतां च प्रदाय सहृदयानां हृदयं रञ्जयन्ति। अतः अद्यावधिजनाः संस्कृतसाहित्ये विद्यमानाः लघुलघुकथाः रामायणकथाः महाभारतकथाः च स्वोत्तसूरीन् उक्त्वा अज्ञात्वैव संस्कृतसाहित्ये तेषां रुचिम् उत्पादयन्ति। अतः वक्तुं शक्नुमः यत् संस्कृतवाङ्मयस्य रक्षणे संस्कृतसाहित्यस्य महती भूमिका वर्तते किञ्च संस्कृतसाहित्यस्य समृद्धये कवीनाम् विशिष्टम् अवदानां विद्यते इति। संस्कृतसाहित्यभाण्डागारे अनेके रत्नस्वरूपाः कवयः अजायन्त। तेषु विंशशतकीयाः प्रो० रसिकविहारीजोशिवर्याः अन्यतमाः सन्ति। एतेन विदुषा अनेकानि अमूल्यानि ग्रन्थरत्नानि विरचितानि। तेषु राधापञ्चशतीमहाकाव्यम् अन्यतमम्। तत्र वर्णितेषु श्लोकेषु गुणानां स्वरूपवर्णनमेव अस्य शोधलेखस्य मुख्यम् उद्देश्यम् अस्ति।

## ❖ काव्ये गुणानां स्थानम्—

साहित्यशास्त्रे काव्यस्य शोभावर्धकाः धर्माः भवन्ति गुणाः। मनुष्येषु यथा शौर्यं दया विनयः इत्यादयः अन्तर्गुणाः भवन्ति किञ्च ते मनुष्यस्य उत्कर्षाधायकाः भवन्ति तथैव काव्येऽपि गुणाः काव्यस्य रसोत्कर्षतां रमणीयतां च वर्धयन्ति। अतः गुणाः काव्यस्य अन्तःस्थिताः सौन्दर्यधर्माः सन्ति ये तावत् रसस्य उत्कर्षतां वर्धयन्तः पाठकस्य सहृदयतां तर्पयन्ति। विविधाः आचार्याः गुणानां भिन्ना भिन्ना संख्या स्वीकृता वर्तते। प्राचीनपरम्परायां तावत् गुणानां दशसंख्यात्वं स्वीकृतम् अस्ति। तत्र श्लेषः, प्रसादः, समता, माधुर्यम्, सुकुमरता, अर्थव्यक्तिः, उदारता, ओजः, कान्तिः, समाधिः इत्येते दश गुणाः सन्ति। परन्तु अग्रे मम्मटादयः आचार्याः एतेषां समेषां गुणानां स्थाने त्रीन् गुणान् एव स्वीकृतवन्तः। अन्यान् गुणान् तु एतेषु एव अन्तर्भावितवन्तः। ते त्रयः गुणाः सन्ति माधुर्यम् ओजः प्रसादश्च। वामनः गुणस्य लक्षणम् उक्तवान्- "काव्यशोभायाः कर्तारो धर्माः गुणाः"[1]

इति। मम्मटाचार्यः गुणस्य लक्षणं करोति-

ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः।
उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः॥[2]

[1] काव्यालङ्कारसूत्राणि (स्वोपज्ञवृत्तिसहितानि कला-प्रतिकलासंस्कृत-हिन्दीव्याख्योपेतानि), गुणविवेचन नाम तृतीयाधिकरणम्, लोकमणिदाहालः, चैखम्बा अमृतभारती प्रकाशन, पुटम्-०२।

[2] काव्यप्रकाशः (बालचित्तानुरञ्जनी-सारबोधिनी-दर्पणाख्यटीकात्रयसंवलितः), डा० गोपराजुरामा, डा० जगन्नाथपाठकः (सम्पादकौ), गङ्गानाथ झा केन्द्रीयसंस्कृतविद्यापीठम्, पुटम्-३१५।

International Journal of
Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281

अर्थात् आत्मनः शौर्यादयः गुणाः यथा भवन्ति तथैव रसस्य उत्कर्षकारकाः धर्माः गुणाः इति उच्यन्ते। यद्वा भवतु परन्तु काव्ये गुणानां महत्त्वम् अतुलनीयम् अस्ति। तथाहि गुणाः काव्यस्य सौन्दर्यं वर्धयन्ति, रसस्य उत्कर्षतां वर्धयन्ति, अलङ्काराणां प्रभावं वर्धयन्ति, सहृदयस्य मनसि प्रभावम् अपि जनयन्ति अतः गुणरहितं काव्यं निरसकाव्यम् इव भवति। इदानीं पूर्वोक्तानां त्रयाणां गुणानां विषये क्रमशः विस्तरेण अत्र आलोचयामि-

❖ **माधुर्यगुणः**—

साहित्यशास्त्रे प्रोक्तेषु त्रिषु गुणेषु माधुर्यगुणः अतीवमहत्त्वपूर्णः अस्ति। माधुर्यं नाम सरलता रमनीयता। अयं गुणः सहृदयस्य मनोमुकुरं सरलभावेन आनन्देन च पूरयति। अस्य गुणस्य प्रयोगः अधिकतया श्रृङ्गाररसयुक्ते शान्तरसयुक्ते करुणरसयुक्ते च काव्ये दृश्यते। माधुर्यगुणस्य लक्षणं कृतम् आचार्येण साहित्यदर्पणे- "चित्तद्रवीभावमयो ह्लादो माधुर्यमुच्यते" इति। अर्थात् यः ह्लादः अथवा आनन्दः सहृदयस्य हृदयं आह्लादयति सः माधुर्यगुणः भवति। तस्य मते माधुर्यं चित्तं आर्द्रीकरोति इति। मम्मटाचार्यः माधुर्यगुणस्य लक्षणं कृतवान्— "आह्लादकत्वं माधुर्यं श्रृङ्गारे द्रुतिकारणम्"[3] इति। माधुर्यगुणः इत्यक्ते मधुरशब्दानां प्रयोगः एव न भवति अपि तु सम्पूर्णे श्लोके स्निग्धतायाः कोमलतायाः च प्रयोगः भवति। माधुर्यगुणयुक्तस्य काव्यस् पठनेन सहृदयानां हृदये तावत् प्रेम्णः उत्पत्तिः भवति, करुणतायाः जागणं भवति, शान्तिः अनुभूयते ततश्च मनः प्रसन्नमपि भवति। काव्ये एते विषयाः सन्ति चेत् तत्र माधुर्यगुणः वर्तते इति वक्तुं शक्नुमः। काव्ये माधुर्यगुणं प्रयोक्तुं कविः अनेकेषां विषयाणाम् अवधानं करोति, तथाहि माधुर्यगुणं द्योतयितं कोमलवर्णप्रयोगः अतीवोपयोगी भवति। ये वर्णाः तावत् मृदुध्वनिं कोमलध्वनिं कुर्वन्ति तेषां कोमलवर्णानां यथा अल्पप्राणानां, यरलवानां, नकारमकाराणां च प्रयोगेण माधुर्यगुणस्य उत्पत्तिः भवति, पुनः एतेन सह इदम् अपि ज्ञेयं यत् तस्मिन् काव्ये कठोरवर्णानां अर्थात् महाप्राणानां टठडढादीनां च प्रयोगः यथा अधिकः न स्यात्। अन्यथा कोमलवर्णैः उत्पन्नं माधुर्यम् अपि नष्टं भवति।

माधुर्यगुणस्य प्रयोगे द्वितीयः अवधेयः अंशः भवति अल्पसमासप्रयोगः इति। यदि वाक्ये दीर्घसमासयुक्तानि पदानि भवन्ति तदा सः श्लोकः माधुर्यगुणरहितः भवति अतः तत्र अधिकाधिकलघुपदानि, पृथक्पदप्रयोगः, सरलः वाक्यविन्यासः च प्रयोक्तव्यः। तेन काव्यम् अधिकं शोभावर्धकं भवति। माधुर्यगुणस्य वर्धनाय श्रुतिसौन्दर्यस्य विषये अपि ध्यानं देयं भवति। यदा शब्दाः कर्णयोः मधुरधअवनिं जनयन्ति तदा माधुर्यगुणः वर्धते अतः कविना श्रुतिसौन्दर्यम् अपि द्रष्टव्यं भवति। एवञ्च कोमलशब्दप्रयोगः, अल्पसमासः, ललितपदरचना, श्रुतिसौन्दर्यं, सहजप्रभावयुक्ता भाषा, अनुप्रयासाद्यलङ्काराणां मर्यादितप्रयोगः, कोमलभाववर्णनम् इत्येते विषयाः माधुर्यगुणं वर्धयितुं सहायकाः भवन्ति।

माधुर्यगुणः केषुचित् रसेषु विशेषतया दृश्यते। यथा श्रृङ्गाररसे प्रेमसौन्दर्यमिलनविरहादीनां वर्णने माधुर्यगुणः दृश्यते। एवमेव करुणरसे दुःखस्य प्रकाशनाय माधुर्यगुणस्य प्रयोगः दृश्यते। पुनः शान्तरसेऽपि वैराग्यस्य आध्यात्मचिन्तनादीनां वर्णनाय माधुर्यगुणस्य प्रयोगः भवति। महाकविः कालिदासः माधुर्यगुणस्य प्रयोगे अतीवनिपुणः आसीत्। तस्य अधिकाधिकानि काव्यानि माधुर्यगुणयुक्तानि सन्ति। माधुर्यगुणयुक्तकाव्यस्य पाठेन सहृदयस्य हृदयम् अधिकां आद्रीक्रियते, सहृदयं मोदयति, रसास्वादं गाढं करोति, माधुर्यगुणयुक्तकाव्यं स्मरणे बहुकालं यावत् तिष्ठति, पुनः तादृशकाव्यपठने सहृदयस्य पुनः पुनः इच्छा भवति।

[3] तत्रैव, पुटम्-३२०।

I J A M S R
**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

पूर्वमेव अस्माभिः चर्चितं यत् श्रीराधापञ्चशतीकाव्ये मूलरसः शृङ्गाररसः अथवा भक्तिरसः अस्ति। किञ्च शृङ्गारकरुणशान्तरसयुक्तेषु काव्येषु माधुर्यरसस्य प्रयोगः अधिकः भवति अतः इदमपि प्रकृतं काव्यं माधुर्यगुणयुक्तमेव वर्तते इति वक्तुं शक्नुमः। श्रीराधापञ्चशतीकाव्यतः अस्य माधुर्यगुणस्य कानिचन उदहरणानि पश्यामः। तथाहि-

राधा कज्जललोचनाऽधरपुटे ताम्बुलरागाञ्चिता
नासा जातिकुड्मला सुरभिताऽम्भेजस्रजा मोहिनी।
कर्णान्दोलितदुग्धकुन्दकलिका हस्तारविन्दद्वयी
पादालक्तकरागिणी भवतु मे प्रव्यूहविध्वंसिनी॥

कज्जललोचना अधरपुटे ताम्बुलराधाञ्चिता नासा जातिकुड्मला अम्भेजस्रजा सुरभिता मोहिनी कर्णान्दोलितदुग्धकुन्दकलिका हस्तारविन्दद्वयी पादालक्तकरागिणी राधा मे प्रव्यूहविध्वंसिनी भवतु इत्यन्वयः। अत्र कविः पादालक्तकरागिण्याः राधायाः वर्णनं अतीव कोमलवर्णैः सुललयारीत्या करोति, नास्ति अत्र दीर्घसमासोक्तानां पदानां प्रयोगः अतः काव्यमिदं माधुर्यगुणयुक्तम् अस्ति इति वक्तुं शक्नुमः।

सम्भोगशृङ्गारस्य वर्णने माधुर्यगुणस्य एकं प्रयोगं तावत् पश्यामः—

पुष्पं चेतुमिवागतां हरिसखीं राधां निकुञ्जे तटे
कालिन्द्या अवलोक्य कन्दुकामिषाच्छृङ्गारमूर्तिर्हरिः।
स्तब्ध्वा तां सहसा स्खलद्रसनया कुत्रास्ति मे कन्दुकं
प्रोच्योरोजमपिस्पृशत् तरलिते नेत्रे प्रियायास्तदा॥

अस्मिन् श्लोके कविना वर्णितं यत् यमुनातटे पुष्पं चेतुम् इव आगतां राधां दृष्ट्वा भगवान् श्रीकृष्णः कुन्दुकानयनभावेन राधायाः मार्गम् अवरुद्ध्य तां स्खलद्रसनया पृष्टवान् यत् मम कन्दुकं कुत्र अस्ति इति इत्युक्त्वा एव राधायाः स्तनं स्पृष्टवान् तदा प्रियायाः राधायाः नेत्रे तरलिते अभवताम्। राधिकायाः तादृशे नेत्रे अस्मान् रक्षतु इति कवेः आशयः। अस्मिन्नपि श्लोके पश्यामः यत् श्रुतिमधुरवर्णानां प्रयोगः अस्ति, दीर्घः समासोऽपि नास्ति पुनः पदलालित्यं बहुसम्यक् अस्ति किञ्च अस्मिन् श्लोके सम्भोगशृङ्गारभक्तिरसः वर्तते इति कृत्वा इदं पद्यं शृङ्गारभक्तिरसे माधुर्यगुणप्रयोगस्य उदाहरणम् अस्ति।

❖ **ओजगुणः**—

साहित्ये प्रयुक्तेषु गुणेषु द्वितीयः प्रमुखः गुणः अस्ति ओजगुणः। आचार्यवामनस्य मते गाढबन्धत्वम् ओजः इति। अर्थात् पदानां दृढः, सघनः, शक्तियुक्तः च बन्धः ओजः इति उच्यते। आचार्यः मम्मटः अपि ओजोगुणं चित्तस्य विस्ताररूपदीप्तिजनकत्वेन वर्णितवान्। तथाहि मम्मटस्य मते दीप्त्यात्मविस्तृतेर्हेतुरोजो वीररसस्थितिः इति। अर्थात् येन गुणेन मनसि उत्साहः, तेजः, पराक्रमः च जन्यते सः गुणः ओजः भवति। कविः यदा काव्ये ओजगुणस्य प्रयोगं करोति तदा सः तत्र शक्तिशालिपदानां प्रयोगं, दीर्घसमासयुक्तानां पदानां प्रयोगं, संयुक्तव्यञ्जनानाम् अधिकं प्रयोगं, गाम्भीर्यपूर्णां वाक्यरचनां च कुर्यात् येन सहृदयस्य उत्साहपराक्रमशौर्यादिभावानां सम्यक् अनुभूतिः भवति। माधुर्यगुणेन सह यथा शृङ्गारशान्तकरुणादीनां रसानां सम्बन्धः भवति तथैव ओजोगुणेन सह वीररसस्य रौद्ररसस्य बीभत्सरसस्य च सम्बन्धः भवति। एतेषु रसेषु एव ओजोगुणः अधिकतया व्यज्यते। एतेषु त्रिषु अपि वीररसे ओजगुणः अधिकतया व्यज्यते। ओजोगुणेन यतो हि वीररसस्य प्रकटनं भवति अतः ओजोगुणं

I J A M S R
International Journal of
Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281

द्योतयितुं वाक्यविन्यासोऽपि किञ्चित् कठोरः एव भवति। अतः अत्र टवर्गीयव्यञ्जनानाम् अत्यधिकः प्रयोगः भवति, पुनश्च दीर्घसमासानां प्रयोगः भवति, संयुक्ताक्षरयुक्तपदानां प्रयोगः भवति, किञ्च क्रियापदानां प्रयोगः शीघ्रतया क्रियते। येषु काव्येषु बलस्य पराक्रमस्य तेजस्वितायाः वा प्रामुख्यं दृश्यते अर्थाद् यत्र कविः एतान् विषयान् वर्णयितुम् इच्छन्ति तत्र कवयः ओजोगुणस्य व्यवहारं कुर्वन्ति। श्रीराधापञ्चशतीकाव्ये भक्तिशृङ्गाररस्यैव अधिकतया प्रयोगः विद्यते इति पूर्वमेव उक्तम्। अतः अत्र माधुर्यगुणस्यैव प्रयोगः विद्यते न तु ओजगुणस्य। यद्यपि काव्ये रौद्रभक्तिरसस्य किञ्च वीरभक्तिरसस्य प्रयोगः अपि विद्यते इति पूर्वमेव उक्तम् अस्ति अतः केषुचित् स्थलेषु सामान्यरूपेण ओजगुणस्य प्रयोगः भवति परन्तु तदपि अतीवन्यूनस्थलेषु एव भवति। तत्र रौद्ररसस्य एकम् उदाहरणं पश्यामः-

शक्रं केऽपिभजन्तु यागविधिना बालाय कोपङ्करं
यस्मिन्नास्ति गतिः सुरक्षणविधौ स्निग्धस्य सूनोरपि।
अस्माकं तु मनो सदैव रमतां श्रीराधिकायां मुदा
क्रोधाद् या रहिता दृशैव कुरुते संरक्षणं द्वेषिणाम्॥

अत्र यद्यपि रौद्रभक्तिरसस्य प्रयोगः विद्यते तथाहि ओजयुक्तानां कठोरवर्णानां तथा प्रयोगः न दृश्यते।

- **प्रसादगुणः**—

संस्कृतसाहित्ये प्रयुक्तः तृतीयः गुणः विद्यते प्रसादगुणः। यत्र काव्यस्य अर्थः सरलतया स्पष्टतया च अवगम्यते तत्र प्रसादगुणस्य प्रयोगः भवति। अनेन गुणेन काव्यं सर्वजनग्राह्यं हृदयस्पर्शि च भवति। प्रसादः इति शब्दस्य सामान्यः अर्थः भवति स्वच्छता प्रसन्नता निर्मलता वा। यस्य गुणस्य प्रभावेन काव्यार्थः सहसा पाठकस्य अथवा श्रोतुः चित्तं प्रविशति सः गुणः प्रसादः। काव्यप्रकाशे मम्मटेन प्रसादगुणस्य विषये उक्तम्- “श्रुतमात्रेण शब्दात्तु येनार्थप्रत्ययो भवेते सः प्रसादः” इति। अर्थात् शब्दश्रवणमात्रेण यत्र सम्यक् अर्थबोधः जायते तत्र प्रसादगुणः भवति। विश्वनाथाचार्याः प्रसादगुणस्य विषये वदति यत् अयं प्रसादगुणः सर्वरसमान्यगुणः भवति अर्थात् सर्वरससामान्यगुणत्वेन अत्र स्वीकारः भवति। अयं गुणः कस्मिन्नपि एकस्मिन् रसे न तिष्ठति अपि तु समेषां रसानां सौन्दर्यवर्धकः भवति। प्रसादगुणयुक्ते काव्ये अर्थस्य स्पष्टता, सरलपदप्रयोगः, अल्पसमासप्रयोगः, सहजचार्थबोधकता, वाक्यसौष्ठुवम् इत्येते विषयाः भवन्ति। कविः यस्मिन् काव्ये प्रसादगुणस्य प्रयोगं करोति तत्र एतानि लक्षणानि स्पष्टरूपेण दृश्यन्ते। प्रसादः गुणः सहृदयानां पुरतः काव्यस्य ग्राहकतां वर्धयति। यदि कस्मिंश्चित् काव्ये विषयः अति गहीनः अस्ति किञ्च तस्य विषयस्य प्रतिपादनाय कठिनवर्णसमुच्चयस्य प्रयोगः क्रियते तर्हि तत् साधारणानां सहृदयानां हृदयं न स्पृशति तत्तु केवलं प्रौढानाम् आस्वादयोग्यं भवति परन्तु यदि तस्मिन् काव्ये कविः प्रसादगुणस्य प्रयोगं कुर्यात् तर्हि तत् काव्यं साधारणैः सहृदयैः अपि ग्राह्यं भवति। यथा निर्मलं जलं सहजतया तृष्णां शामयति तथैव प्रसादगुणयुक्तं काव्यं सरलमार्गेण हृदयं स्पृशति। इदानीं प्रसादगुणयुक्तेन काव्ये सह रसस्य सम्बन्धं पश्यामः। प्रसादगुणः तावत् सर्वेषु रसेषु दृश्यते किन्तु तत्रापि शान्तरसे करुणरसे भक्तिरसे च अस्य गुणस्य विशेषप्रभावः अनुभूयते। यतो एतेषां रसानाम् अनुभवाय भावस्य स्पष्टप्रकटनम् अपेक्षितं भवति अतः एतेषु रसेषु एव प्रसादगुणः अधिकः दृश्यते।

इदानीं श्रीराधापञ्चशतीकाव्यतः प्रसादगुणयुक्तानां केषाञ्चन श्लोकानां वर्णनं क्रियते—

राधे ते गुणमाधुरी रससुधा सिन्धोरनन्तान् गुणान्
पायं पायमहर्निशं दिवि सुराः संभोजिरेऽमर्त्यताम्।
द्वित्रास्ते गुणसागरस्य कणिका पीत्वा कृतार्था वयं
शुभ्रांशोर्हिमशीतलास्त्रिचतुरानुस्राश्चकोरा यथा॥

अस्मिन् पद्ये कविः वदति हे राधे तव गुणमाधुरी रससिन्धुः अस्ति यस्य रससिन्धोः अनन्तान् गुणान् अहर्निशं पीत्वा पीत्वा सुराः अमर्त्यतां संभेजिरे, परन्तु वयं भक्ताः तु तस्य गुणसागरस्य द्वित्राः कणिकाः पीत्वा एव कृतार्था अभवन्। यथा चक्रवाकः शिमांशोः त्रिचतुरान् कणान् पीत्वा एव कृतार्थः भवति। अत्र श्लोके प्रत्येकं पदम् अतीवसरलम् अस्ति। सरलैः पदैः एतादृशस्य गूढस्य भावस्य प्रकटनाय अत्र कविः प्रसादगुणस्य प्रयोगं कृतवान्। इदं प्रीतिभक्तिरसे प्रसादगुणप्रयोगस्य उदाहरणम् अस्ति।

प्रसादगुणस्य प्रयोगम् इतोऽपि एकस्मिन् पद्ये पश्यामः। तथाहि—

मलमूत्रयुतं वपुराकलितं
कलितं सकलं क्षणभङ्ग्युतम्।
प्रियसङ्गतिरत्र मुधाकलिता
वृषभानुसुता हृदये कलिता॥

मलमूत्रयुतं वपुः आकलितं क्षणभङ्ग्युतं सकलम् कलितं, अत्र मुधा प्रियसङ्गतिः आकलिता, हृदये वृषभानुसुता कलिता। अर्थात् इदं मानववपुः मलमूत्रयुक्तम् अस्ति, जगति विद्यमानं सर्वम् अपि क्षणभङ्गुरम् अस्ति, पुनः प्रियया सह सङ्गतिः अपि मुधा आकलिता अस्ति केवलं वृषभानुसुता श्रीराधा एव गतिः अस्ति। अस्मिन् श्लोके राधानाम्नः माहात्म्यवर्णनप्रसङ्गे प्रसादगुणस्य प्रयोगः कृतः अस्ति। एवमेव श्रीराधापञ्चशतीकाव्ये अनेकेषु श्लोकेषु अस्य प्रसादगुणस्य प्रयोगः दृश्यते।

### ❖ उपसंहारः—

संस्कृतसाहित्ये तावत् माधुर्यः ओजः प्रसादः इत्येतेषां त्रयाणां गुणानाम् उल्लेखः अस्ति। तेषु माधुर्यगुणस्य प्रभावेण काव्यं न केवलम् अर्थबोधकं भवति अपि तु हृदयस्पर्शि आनन्ददायकं रसपूर्णं च भवति। ततश्च शृङ्गारकरुणशान्तरसयुक्तेषु काव्येषु अस्य गुणस्य प्रयोगः दृश्यते। अस्मिन् गुणे तावत् कोमलशब्दानां सरलवाक्यरचनानां समासरहितप्रयोगानां च उपस्थितिः दृश्यते इति वर्णितम्। ततः अग्रे ओजोगुणस्य विषये वर्णितं यत् ओजोगुणः संस्कृतसाहित्ये तेजोमयः गुणः अस्ति। ओजगुणस्य प्रभावेण काव्ये गाम्भीर्यं उत्साहस्य भावः च आगच्छति। यदा कविः काव्ये वीररसस्य रौद्ररसस्य वा वर्णनं कर्तुम् इच्छति तदा तत्र ओजोगुणस्य प्रयोगः करणीयः भवति। ओजोगुणयुक्तकाव्ये कठोरवर्णानां प्रयोगः समासबहुलशब्दानां प्रयोगः च अधिकः भवति। तेन च काव्ये औदार्यस्य शौर्यस्य पराक्रमस्य च स्फुटता अधिका भवति। ततः अग्रे मया प्रसादगुणविषये विस्तरेण निरूपितम्। तथाहि प्रसादगुणः काव्ये सहजतां सरलतां स्पष्टतां च वर्धयति। यत्र काव्ये शब्दाः अतीवसुलभाः सरलाः किञ्च वाक्ये समासराहित्यं, वाक्यरचना च अक्लिष्टा किञ्च अर्थः स्फुटः प्रतीयते तत्र कविना प्रसादगुणस्य प्रयोगः कृतः अस्ति इति वक्तुं शक्यते। अयं गुणः न केवलं काव्यस्य सौन्दर्यं वर्धयति अपि तु सहृदयानां चित्ते

I J A M S R
International Journal of
Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281

सरलतया काव्यस्य गूढार्थबोधनेऽपि समर्थः भवति। शान्तकरुणादिरसेषु यत्र गुणः अर्थः प्रतिपादनीयः अस्ति किन्तु तत् सरलवाक्यविन्यासेन प्रतिपादनीयम् अस्ति चेत् कवयः अस्य गुणस्य प्रयोगं कुर्वन्ति। एवञ्च एतेषां गुणानां वर्णनं विधाय श्रीराधापञ्चशतीकाव्ये एतेषु कस्य गुणस्य प्रयोगः विद्यते इत्यस्मिन् विषये विस्तरेण चर्चितम्। तथाहि काव्यमिदं शृङ्गारकरुणशान्तरसानां प्रयोगः विद्यते इति कृत्वा अत्र माधुर्यगुणस्य युक्तः विद्यते। एवमेव प्रसादगुणः अपि भक्तिरसे करुणरसे शान्ते रसे च प्रयुज्यते अतः श्रीराधापञ्चशतीकाव्ये अधिकतया प्रसादगुणस्य प्रयोगः अपि अस्ति। श्रीराधापञ्चशतीकाव्यं वीररौद्रप्रधानं नास्ति अतः अस्मिन् ओजोगुणस्य अधिकः प्रयोगः न भवति तथापि श्रीरूपगोस्वामिना हरिभक्तिरसामृतसिन्धौ भक्तिरसस्य ये द्वादशभेदाः दर्शिताः तेषु वीरभक्तिरसस्य किञ्च रौद्रभक्तिरसस्य प्रयोगः श्रीराधापञ्चशतीकाव्ये दर्शितः अस्ति अतः अस्मिन् काव्ये ओजोगुणस्यापि प्रयोगः किञ्चिद् अस्ति एव।

**परिशीलितग्रन्थसूची**

1. मम्मटः। *काव्यप्रकाशः (बालबोधिन्याख्यटीकया समन्वितः)*। भट्टवामनः (टीकाकारः संशोधकश्च)। मुम्बई : निर्णयसागरयन्त्रालयः। १९०१। द्वितीयं संस्करणम्।
2. मम्मटः। *काव्यप्रकाशः (बालचित्तानुरञ्जनी-सारबोधिनी-दर्पणाख्यटीकात्रयसंवलितः)*। डा० गोपराजुरामा, डा० जगन्नाथपाठकः (सम्पादकौ)। एलाहावाद : गङ्गानाथ झा केन्द्रीयसंस्कृतविद्यापीठम्। १९७६।
3. विश्वनाथः, कविराजः। *साहित्यदर्पणः (विमलाख्यया हिन्दीव्याख्यया विभूषितः)*। श्रीकान्तशास्त्री (प्रकाशकः)। लखनऊ : नवलकिशोर प्रेस। १९३४। द्वितीयं संस्करणम्।
4. *प्रोफेसर रसिक विहारी जीशी कृत श्रीराधापञ्शती काव्यं का समीक्षात्मक अध्ययन*। राजेश सिंह (अनुसन्धाता)। इलाहावादविश्वविद्यालयः। २०००।
5. श्रीरूपगोस्वामी। *हरिभक्तिरसामृतसिन्धुः (श्रीजीवगोस्वामिपादकृतया दुर्गमसंगमन्याख्यटीकया सहितः)*। गोस्वामिदामोदरशास्त्री (सम्पादकः)। वाराणसी। १९८८।
6. भरतमुनिः। *नाट्यशास्त्रम् (प्रारम्भिकध्यायद्वयमात्रम्)*। श्रीजगन्नाथशास्त्री तैलङ्ग (सम्पादकः)। दिल्ली : भारतीयविद्याप्रकाशन। २०००। प्रथमसंस्करणम्
7. रूपगोस्वामी। *उज्ज्वलनीलमणिः (लोचनरोचनीनाम्न्या आनन्दचन्द्रिकानाम्न्या टीकया च सहितः)*। नारायणगोस्वामी महाराजः (सम्पादकः)। श्रीभक्तिवेदान्ततीर्थमहाराजः (प्रकाशकः)। गौडीयवेदान्तप्रकाशनम्। २००६। प्रथमसंस्करणम्।